M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 1119

Title: Pratima Sthapan

1119

C ~~प्रतिमा प्रतिष्ठा~~ In Complete

Pratima Sthapan			Title
			Author
			Editor
			Year, Vols.
510			Publisher
1119			Remarks

प्रति. श्रीगणेशाय नमः अविघ्नमस्तु उदगयने सर्वदेवतास्थापनं प्रशस्तमिति हेमा
द्रिः दक्षिणायनेपि मातृभैरववाराहनरसिंहत्रिविक्रमः महिषासुरहंत्र्यश्च स्था
१ प्यावै दक्षिणायने इति माधवीये वैखानसोक्तेः वैशब्दो अप्यर्थे इदं तु स्वगृ
ह्यातिरिक्तविषयं स्वगृहे स्थापनं नेष्टं तस्माद्दक्षिणायने इति हेमाद्रौ लक्षण
समुच्चयोक्तनिषेधात् शिशिरोवसंतो ग्रीष्मो हेमंतः शस्ताः फाल्गुनचैत्रवैशा
खज्येष्ठमासेषु सर्वदेवतास्थापनं शुभदमिति मात्स्योक्तेः माघफाल्गुनवैशा
खज्येष्ठाषाढमासा लिंगस्थापने शुभा इति रत्नावल्यां माघश्रावणभाद्रपद
निषेधाः शिवस्थापनव्यतिरिक्तविषयः तत्र शिवस्थापनोक्तेरिति निर्णयसिं १
धुः विष्णुप्रतिमायां मार्गशीर्षपौषमाघा अशुभा इति हेमाद्रौ वैखानसो श्राव
णाश्विनयोर्निषेधो विष्णुव्यतिरिक्तविषयः अन्ये शुभाः देवीपुराणे शक्तिस्था

पने विशेषः माघाश्वियुजावुत्तमौ न तिथिर्न च नक्षत्रं नोपवासो च कारणं सा
र्वकालं भक्तस्य कृष्णपक्षे विशेषतः इति निर्णयसिंधौ मलमासस्तु देवकार्ये निषि
द्ध एव सर्वदेवानां शुक्लपक्ष इति प्रशस्तः चतुर्दश्यमा निषिद्धाः सर्वेषु भद्रकार्यव्य
तिरिक्तानां नवमी निषिद्धा गणेशातिरिक्तानां चतुर्थी निषिद्धा वारेषु भौमः न
क्षत्राणीति मात्स्ये आषाढद्वे तथा मूलमुत्तरात्रयमेव च ज्येष्ठाश्रवणरोहिण्यः
पूर्वाभाद्रपदा तथा हस्तोश्विनी रेवती च पुष्यो मृगशिरस्तथा अनुराधा तथा स्वा
ती प्रतिष्ठासु प्रशस्यते इति आषाढद्वे श्रीपतीरत्नमालायां रोहिण्युत्तरपौ
ष्णवैष्णवकरादित्याश्विनीवासवानुराधेंद्वज्जीवभेषु गदितं विष्णोः प्रतिष्ठापनं
पुष्यश्रुत्यभिजित्सु [illegible]शाकरयोर्भिन्नाधिपस्कंदयोर्मैत्रे तिग्मरुचेर्करे निर्ऋति
भे दुर्गादिकानां शुभं पुष्यश्रवणाभिजित्सु ईशब्रह्मणोः प्रतिष्ठा शुभा अनुराधायां

च॰प्र॰ कुबेरस्कंदयोः हस्तेरवेः मूलक्षे दुर्गागणेशयोः निर्णयसिंधौ गणपरिवृढरक्षोय

क्षक्षतः स्कराणां प्रमथफणिसरस्वत्यादिकानां चपौष्णे श्रवासिस्कगतनाम्नो वासवे

२ लोकपानां नगदतिमखिलानां स्थापनं चारुचित्रेषु गणपरिवृढो गणेशः रेव

त्यां प्रतिष्ठा शुभा श्रवणे सुगतनाम्नो देवस्य धनिष्ठायां अष्टौ लोकपालानां

अन्येषां च स्थिरतिथ्यादिषु शुभा निर्णयसिंधौ तेजस्विनी क्षेमकृदग्निदाहवि

धायिनी स्याद्धनदा दृढा च आनंदकृत्कल्पविनाशिनी च सूर्यादिवारेषु भवेत्प्रतिष्ठा

तेजस्विन्यादि सप्तदेव्यो रविवारादिषु क्रमेण स्थाप्या इत्यर्थः गुरुशुक्रास्तेन

कार्या कर्तृराशेः शुद्धि त्रिषट्दशाम्येकादशराशयः शुभाः वसिष्ठः प्रतिष्ठास्थि

रलग्नस्याद्द्वन्द्वकन्याधनुर्झषं पापैस्त्र्यायारिगैर्युक्तो सौम्यैर्धीधर्मषष्ठवर्जितैः

यतिभिः सार्वकालं लिंगस्थापनं कार्यं यतीनां सार्वकालेषु लिंगस्यारोपणं

स्मृतं इति कल्पतरुः इति प्रतिष्ठाकालः अथ पूर्वकर्तव्यताविधिः

तीर्थोदकेनादौ मूर्तिं प्रक्षाल्य ततो गजाश्वरथ्यावाल्मीकसंगमहृद्गोष्ठस्थान

क्रमेण गतसप्तमृद्भिः सप्तदिनानि संलिप्य ततः पद्मजकोष्ठकुंकुमकेसरदेवदारुभिः

पंचदिनानि ततो व्रीहियवमाषशालितिलमुद्गप्रियंगुश्यामाकपिष्टैः क्रमेण सप्तरात्रं

या ओषधीरिति सूक्ते ततः पंचगव्येन सप्तदिनानि तद्यथा गायत्र्या गोमूत्रं गंधद्वारे

ति गोमयं आप्यायस्वेति क्षीरं दधिक्राव्ण इति दधि तेजोसीति घृतं देवस्य त्वेति कु

शोदकं पंचगव्यान्येकीकृत्य तस्मिन्नापोहिष्ठेति त्र्यृचेन एवं सप्तदिनानि ततो ऽर्ध्वेर्नैने

दिनं द्धात्रिः घृतेन मधुना शर्करया च त्रित्रिदिनं पंचामृतमंत्रैः सच्छिद्रकलशे गंगा

दितीर्थोदकं न्यस्याभिषिंचेदेतैर्मंत्रैः कद्रुद्रायेति नवभिः ९ अतोदेवा इति षड्भिः ६ स

मुद्रादूर्मिरित्येकादशभिः ११ त्रिभिष्ट्वमिति सप्तभिः ७ प्रसम्राज इत्यष्टभिश्चाभिषिं

च्य दाहोपशमनार्थं स्वशोक्तमंत्रैरभिषिच्य ततोग्निपदव्यतिरेकेणाग्निः सप्तिमिस्स

कं पठित्वा पुनस्तत्सहितेन पूर्वे एवं सहस्रावृत्त्या पंचशदावृत्त्या वान्युत्तारणं कृत्वा

तत्तद्देवतामंत्रेण वैदिकेन अरूपादिकेनागमोक्तमंत्रेण वा गायत्र्या वाभिषिंच्य सर्वत्र

च.प्र थोदकैर्दिनं संस्नाप्य ततस्त्रिदिनं क्षीरकुंभे न्यस्य मूलमंत्रं प्रतिदिनमष्टोत्तरशतं जपे
त् ततो नारिंगरसेन शर्करया च प्रतिमां प्रक्षाल्य आपो हि ष्ठेति तिसृभिः संस्नाप्य प्रति
३ ष्ठां कुर्यात् इति नूतनप्रतिष्ठायाः पूर्वकर्तव्यविधिः अथ चलमूर्तिप्रतिष्ठाप्रयोगः अथ
उक्तदिनात्पूर्वेद्यु दशद्वादशषोडशान्यतरहस्तमात्रं मंडपं कृत्वा तत्राग्नेय्यां हस्तमात्रं
चतुरस्रं कुंडं वा स्थंडिलं कृत्वा तत्प्रतीच्यां स्थंडिले ऽधिवासनहोमस्नानसमये ऽश्वत्था
दिकषायैर्नासपल्लवैः सर्वौषधियुक्तैश्चतुरो कलशान् स्थापयेत् तत्पक्षे परेद्युर्मंडपप्रतिष्ठां कु
र्यात् तद्यथा अथाचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्यां मूर्तौ देवस्य सा
निध्यतासिद्धये मम दीर्घायुर्लक्ष्मीसर्वकामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थम
मुकमूर्तिप्रतिष्ठां करिष्ये इति संकल्प्य गणेशपूजनादि नांदीश्राद्धांतं कृत्वा ऽऽचार्यं
ब्रह्माणं सदस्यं द्वादशाष्टौ चतुरो वा ऋत्विजश्च वृत्वा गंधाद्यैः पूजयेत् तत आचा ३
र्य आचम्य प्राणानायम्य देशकालौ स्मृत्वा यजमानेन वृतोऽहमाचार्यकर्म करिष्ये

यदत्रेति सर्षपान्विकीर्य आपो हि ष्ठेति त्र्यृचेन शुचीवो हव्येति पंचगव्यं कुशोदकेनाभ्यु
क्ष्य भूमिं स्पृष्ट्वा तत्संभारान्प्रोक्ष्य देवा आयांतु यातुधाना अपयांतु विष्णो देवयज
नं रक्षस्वेति भूमौ प्रादेशं कृत्वा मंडपप्रतिष्ठां च कृत्वा पूर्वरात्रौ हिरण्योपधानं देवं
पंचगव्ये हिरण्ययवदूर्वाश्वत्थपलाशपर्णैरापो हि ष्ठेति तिसृभिर्हिरण्यवर्णा इति चत
सृभिः पवमानः सुवर्जन इत्यनुवाकेनाभिषिच्य व्याहृतिभिरिदं विष्णुरिति पुष्पप
ल्लवयवदूर्वाः समर्प्य रक्षोहणमिति मंत्रेण हस्ते कंकणं बद्ध्वा वाससाच्छाद्य अवतेहे
ळ उदुत्तमामिति मंत्रेण जले ऽधिवासयेत् ततोऽग्निं प्रतिष्ठाप्यान्वादध्यात् अस्मिन्न
न्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा स्थाप्यदेवतानां पलाशोदुंबराश्वत्थ
शम्यपामार्गसमिद्भिराज्येन चरुणा तिलैर्व्रीहिभिश्च प्रत्येकमष्टसहस्रमष्टशतमष्टाविंश
ति संख्याकाभिर्वा पंचपर्यायान् शेषेणेत्यादि समिद्यमन्वाधानाद्य परिसमूहना
दि चक्षुषी अंते स्थाप्यदेवतामंत्रेण जुहुयात् प्रतिद्रव्यं होमांते देवं पादनाभिशिरः स्पृशेत्

च·प्र आज्यहोमेभ्योत्तरतःसजलप्रैषेकुंभेसंपाताच्चयेत् ततःप्रधानहोमांतेपुनःस्थाप्य
देवतामंत्रेणाज्यंकृत्वा देवंजलान्निष्काश्य तस्यपादौस्पृशेत् संपातजलैरभिषिंचे
४ द्दर्चयेच्च एवंद्वितीयेनाभिषिंच्य तृतीयेमध्यंचतुर्थेऊरः पंचमेशिरस्पृष्ट्वाप्रतिपर्यायंसं
पातजलेनदेवमभिषिंचेच्च ततःस्विष्टकृदादिहोमशेषंसमाप्य अर्चांशोधयेत् ततो
देवंनत्वा स्वागतंदेवदेवेशविश्वरूपनमोस्तुते शुद्धेपित्वय्यधिष्ठानेशुद्धिंकुर्मःसहस्व
तामितिसंप्रार्थ्य उत्तिष्ठब्रह्मणस्पतइतिमंत्रं ऋत्विग्भिरुत्थाप्यपूर्वमकृतेऽग्न्युत्तारणमधु
नाकार्यं अग्निःसप्तिमितिसूक्तस्य सौचिकोग्निर्वैश्वानरोवाऋषयः अग्निर्देवता॥
त्रिष्टुप्छंदः नूतनप्रतिमायामग्न्युत्तारणेविनियोगः आद्यावग्निपदरहितंपठित्वात
त्सहितंपुनःपठेत् एवमष्टसहस्रमष्टशतमष्टाविंशतिंवापठन् जलंपातयेत् त
तोर्चांद्वादशवारंमृज्जलैश्चप्रक्षाल्य मंत्रवत्पंचगव्यंकृत्वा आप्यायस्वेति आनो ४
राजानमितिचसंस्नाप्य पंचामृतमंत्रैर्देवतामंत्रेणचसंस्नाप्य घृतेवास्पृश्योद्वर्त

६२

नेनोद्वर्त्योष्णोदकेनप्रक्षाल्यगंधंदत्वासंपातोदकेनाभिषिंच्य अत्रपूर्वोक्ताष्टोत्तर
स्ना शतंकलशस्थापनोसंस्थाप्य पुनःसपल्लवैश्चतुर्भिःकुंभैः आपोहिष्ठेतित्रिभिराकलशे
शेष्वितिचप्रत्येकंसमुद्रज्येष्ठेतिचतुर्भिराकलशेक्षितिचमीलितैःसंस्नाप्य औदुंबरादिपी
ठेर्वाउपवेश्यपरितोप्रागादिदिक्षुक्रमेणसजलकुंभान्संस्थाप्य तेषुगंधपुष्पदूर्वाःक्षिप्त्वा
आद्येसप्तमृदः द्वितीयेपुष्करपर्णशमीवैकंकताश्वत्थपल्लवांश्च तृतीयादिषुसप्तधा
न्यपंचरत्नफलपुष्पाणिकुशदूर्वागोरोचनाः संपातोदकंसर्वौषधीः क्षिप्त्वा क्रमेणापो
हिष्ठेतितित्रिभिः हिरण्यवर्णेतिचतुर्भिः पवमानानुवाकेनचदेवमभिषिंच्यांत्यकुंभेशमी
पलाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणांपल्लवान्कुशांश्चक्षि
प्त्वाअश्वत्थेवइतिदेवमभिषिंच्य पंचरत्नोदकेनहिरण्यवर्णाइतिसंस्नाप्यवाससीदत्वा
उपवीतादिदीपांतंकृत्वानेत्रोन्मीलनमपिकुर्यात् इतिनिर्णयसिंधौ अन्येतुप्राणप्रति
ष्ठोत्तरंनेत्रोन्मीलनमाहुः ततआचार्यः ततआचार्यवेद्यांसर्वतोभद्रेदेवताआवाहयेत्
तद्यथा मध्येब्रह्मणेनमःब्रह्माणमावाहयामि पूर्वादिदिक्षुइंद्रादीन् ईशानाद्यंतरालेषु

च॰प्र वसून्रुद्रानादित्याश्विनौ विश्वान्देवान्पितॄन् नागान्स्कंदवृषो ब्रह्मेशानाद्यं
तरालेषु दक्षं विष्णुं दुर्गां स्वधाकारं मृत्युरोगान् समुद्रान्सरितः मरुतः गणपतिं
५ चेति मध्य एव पृथ्वीं मेरुं स्थाप्य देवतां चावाह्य तत्र प्राणापानादि वज्रं शक्तिं दंडं